भ्रमरेष्टा, स्त्री, (भ्रमराणामिष्टा ।) भार्गी । भूमिजम्बूः । इति राजनिर्घण्टः ॥

भ्रमरोत्सवा, स्त्री, (भ्रमराणां उत्सवः प्रमोदो यस्याः ।) माधवी । इति राजनिर्घण्टः ॥

भ्रमासक्तः, पुं, (भ्रमे भ्रमणे आसक्तः युक्तः ।) शस्त्रमार्जकः । इति हेमचन्द्रः । ३ । ५८० ॥

भ्रमिः, स्त्री, (भ्रम + बाहुलकात् इः ।) भ्रमणम् । तत्पर्य्यायः । भ्रमः २ । इत्यमरः ।३।२।६॥ भ्रमी ३। इति भरतः ॥ (मण्डलाकारगतिः ४ । यथाच नैषधचरिते । १ । ७३ ।

"अचीकरच्चारुहयेन या भ्रमी-
र्निजातपत्रस्य तलस्थले नलः ।")

मण्डलाकारसैन्यरचना । यथा,—

"वीरान् सहस्रशो दृष्ट्वा भ्रमिभिः पर्य्यवस्थितान् ।
लवो लवेन सन्धाय शरान् रोषप्रपूरितः ॥
भ्रमिराद्या सहस्रेण द्वितीयायुतसङ्ख्यया ।
तृतीयायुतयुग्मेन तुरीयायुतपञ्चभिः ॥
पञ्चमी लक्षयोधानां षष्ठी योधायुताधिकैः ।
सप्तमी लक्षयुग्मेन सप्तभिर्भ्रमिभिर्युतान् ॥
मध्ये लवो भ्रमियात्रः सञ्चरन् वह्निवत्तदा ।
दाहयामास सर्व्वान् वै सैनिकान् भ्रमिकारकान् ॥"

इति पाद्मे पातालखण्डे ६१ अध्यायः ॥

भ्रमी, [न्] त्रि, (भ्रम + इनि ।) भ्रमविशिष्टः । भ्रमो विद्यते अस्येति अस्त्यर्थे इन्प्रत्ययेन निष्पन्नः ॥

भ्रश य उ अधःपतने । इति कविकल्पद्रुमः ॥ (दिवां-पर०-अक०-सेट् ।) य भ्रश्यति । उ भ्रंशित्वा भ्रष्ट्वा । इति दुर्गादासः ॥

भ्रष्टं, त्रि, (भ्रंश + कर्त्तरि + क्तः ।) च्युतम् । अस्य पर्य्याया गलितशब्दे द्रष्टव्याः ॥

"अर्थाद्भ्रष्टस्तीर्थयात्रान्तु गच्छेत्
सत्याद्भ्रष्टो रौरवं वै व्रजेच्च ।
योगभ्रष्टः सत्यधृतिञ्च गच्छेत्
राज्याद्भ्रष्टो मृगयां वै व्रजेच्च ॥"

इति गारुडे नीतिसारे १०८ अध्यायः ॥

भ्रस्ज, औ श भ्र पाके । इति कविकल्पद्रुमः ॥ (तुदा०-उभ०-सक०-अनिट् ।) रेफयुक्तादिर्दन्त्योपधः । क्विपि संयोगादिलोपे भृट् । पाक इह भर्ज्जनम् । भ्रश भृज्जति भृज्जते मत्स्यं सूपकारः । औ अभ्राक्षीत् । इति दुर्गादासः ॥

भ्राज, ङ ण ऋ टु भासि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) रेफयुक्तः । ङ भ्राजते ण भ्रेजे बभ्राजे । अनुबन्धबलात् संयोगादित्वेऽप्याकारस्याप्येत्वम् ॥ ऋ अबिभ्रजत् अबभ्राजत् । टु भ्राजथुः । इति दुर्गादासः ॥

भ्राजकं, क्ली, (भ्राज् + "ण्वुल् तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) पित्तम् । इति शब्दचन्द्रिका ॥

भ्राजिष्णुः, त्रि, (भ्राज् + इष्णुच् ।) अलङ्कारादिना दीप्तियुक्तः । इत्यमरः । २ । ६ । १०१ ॥ (यथा, भागवते । २ । ९ । १२ ।

"भ्राजिष्णुभिर्यः परितो विराजते
लसद्विमाना वलिभिर्महात्मनाम् ॥")

विष्णौ, पुं । यथा, तस्य सहस्रनामस्तोत्रे ।

"भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ॥"

भ्रातरौ, पुं, (भ्राता च भगिनी च । भ्रातृस्वसोरित्यादिना एकशेषः ।) भ्रातृभगिन्यौ । नित्यद्विवचनान्तोऽयम् । इत्यमरः । २ । ६ । ३६ ॥

भ्राता, [ऋ] पुं, (भ्राजते इति । भ्राज + "नप्तृनेष्टृत्वष्टृहोत्रिति । उणा० । २ । ९६ । इति तृन् । निपात्यते च ।) एकगर्भजातः । "भाइ" इति भाषा । तत्पर्य्यायः । सहोदरः २ समानोदर्य्यः ३ सोदर्य्यः ४ सगर्भः ५ सहजः ६ सोदरः ७ । इति हेमचन्द्रः ॥ पितरि मृते ज्येष्ठभ्रातुः पितृतुल्यत्वम् । यथा,—

"ज्येष्ठो भ्राता पितृतुल्यो मृते पितरि शौनक ! ।
सर्व्वेषां स पिता हि स्यात् सर्व्वेषामनुपालकः ॥
कनिष्ठस्तेषु सर्व्वेषु समत्वेनानुवर्त्तते ।
समोपभोगजीवेषु यथैव तनयस्तथा ॥"

इति गारुडे ११४ अध्यायः ॥

तस्य भार्य्याहरणे तस्मै दायादाने च दोषो यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्याये ।

"भ्रातृजायापहारी च मातृगामी भवेन्नरः ।
ब्रह्महत्यासहस्रञ्च लभते नात्र संशयः ॥
स याति कुम्भीपाकञ्च यावच्चन्द्रदिवाकरौ ।
तस्मादुत्तीर्य्य पापी च विष्ठायां जायते क्रिमिः ॥
वर्षकोटिसहस्राणि तत्र स्थित्वा च पातकी ।
ततो भवेन्महापापी वर्षकोटिसहस्रकम् ॥
पुंश्चलीयोनिगर्भे च क्रिमिश्चैव पुरन्दर ! ।
शूद्रः कोटिसहस्राणि शतजन्मानि कुक्कुरः ।
भ्रातृजायापहरणात् शतजन्मानि शूकरः ॥"
"यो ददाति न दायञ्च बलिष्ठो दुर्ब्बलाय च ।
स याति कुम्भीपाकञ्च यावच्चन्द्रदिवाकरौ ॥"

भ्रातुरन्वेषणे भ्राता न गच्छेत् । यथा,—

नारद उवाच ।

"हे हर्य्यश्वा महावीर्य्याः प्रजा यूयं करिष्यथ ।
ईदृशो लक्ष्यते यत्नो भवतां श्रूयतामिदम् ॥
वालिशा वत यूयं ये नास्या जानीत वै भुवः ।
अन्तरूर्द्ध्वमधश्चैव कथं स्रक्ष्यथ वै प्रजाः ॥
ऊर्द्ध्वं तिर्य्यगधश्चैव यदाप्रतिहता गतिः ।
तदा कस्माद्भुवो नान्तं सर्व्वे द्रक्ष्यथ वालिशाः ॥
ते तु तद्वचनं श्रुत्वा प्रयाताः सर्व्वतो दिशम् ।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥
हर्य्यश्वेष्वथ नष्टेषु दक्षः प्राचेतसः पुनः ।
वैरिण्यामथ पुत्त्राणां सहस्रमसृजद्विभुः ॥
विवर्द्धयिषवस्ते तु सवलाश्वाः प्रजाः पुनः ।
पूर्व्वोक्तं वचनं ब्रह्मन्नारदेन प्रचोदिताः ॥
अन्योन्यमूचुस्ते सर्व्वे सम्यगाह महामुनिः ।
भ्रातॄणां पदवी चैव गन्तव्या नात्र संशयः ॥
ज्ञात्वा प्रमाणं पृथ्व्यास्तु प्रजाः स्रक्ष्यामहे पुनः ।
तेऽपि तेनैव मार्गेण प्रयाताः सर्व्वतो दिशम् ।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥
ततः प्रभृति वै भ्राता भ्रातुरन्वेषणे द्विज ! ।
प्रयातो नश्यति तथा तन्न कार्य्यं विजानता ॥"

इति विष्णुपुराणे १ अंशे १६ अध्यायः ॥

अपि च, मात्स्ये ५ अध्याये ।

"ततः प्रभृति न भ्रातुः कनीयान् मार्गमिच्छति ।
अन्विष्यन् दुःखमाप्नोति तेन तं परिवर्ज्जयेत् ॥"

ज्येष्ठभ्रात्रादेर्गुरुत्वं यथा,—

"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ।
बन्धुर्ज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ॥"

इति कौर्म्मे उपविभागे ११ अध्यायः ॥

विभक्तानां तेषां धर्म्मवृद्धिर्यथा,—

व्यासः ।

"भ्रातॄणां जीवतोः पित्रोः सहवासो विधीयते ।
तदभावे विभक्तानां धर्म्मस्तेषां विवर्द्धते ॥
भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्म्मणा ।
स निर्भाज्यः स्वकादंशात् किञ्चिद्दत्त्वोपजीवनम् ॥"

ज्येष्ठभ्रातृप्रशंसा यथा,—

"बिभृयाद्वेच्छतः सर्व्वान् ज्येष्ठो भ्राता यथा पिता ।
भ्राता शक्तः कनिष्ठो वा शक्त्यपेक्षा कुले स्थितिः ॥
कुटुम्बार्थेषु चोद्युक्तस्तत् कार्य्यं कुरुते तु यः ।
स भ्रातृभिर्बृंहणीयो ग्रासाच्छादनवाहनैः ॥
अन्योन्यभेदो भ्रातॄणां सुहृदां वा बलान्तक ! ।
भवत्यानन्दकृद्देव ! द्विषतां नात्र संशयः ॥"*॥

भ्रातृसंस्कारस्यावश्यकत्वम् । यथा, नारदः ।

"येषान्तु न कृताः पित्रा संस्कारविधयः क्रमात् ।
कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात् ॥
अविद्यमाने पित्रर्थे स्वांशादुद्धृत्य वा पुनः ।
अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्व्वसंस्कृतैः ॥"

विभक्तानां तेषां साक्षित्वादि यथा,—

"साक्षित्वं प्रतिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥"

इति दायतत्त्वम् ॥

भ्रातृकः, त्रि, (भ्रातुरागत इति । भ्रातृ + "ऋतष्ठञ् ।" ४ । ३ । ७८ । इति ठञ् । भ्रातुरागतधनादि ।) भ्रातृयोग्यः । इति सिद्धान्तकौमुदी ॥

भ्रातृजः, पुं, (भ्रातुः सहोदरात् जायते इति । जन + "पञ्चम्यामजातौ ।" ३।२।९८ । इति डः ।) भ्रातुरपत्यम् । तत्पर्य्यायः । भ्रात्रीयः २ । इत्यमरः । २ । ६ । ३६ ॥ भ्रातृव्यः ३ भ्रातृपुत्त्रः ४ । इति शब्दरत्नावली ॥ (स्त्रियां टाप् । भ्रातृजा । भ्रातुष्पुत्त्राम् ॥)

भ्रातृजाया, स्त्री, (भ्रातुर्जाया ।) भ्रातृभार्य्या । (यथा, मेघदूते । १ । १० ।

"अव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।")

तत्पर्य्यायः । प्रजावती २ । इत्यमरः ।२।६।३०॥

भ्रातृद्वितीया, स्त्री, (भ्रातृमङ्गलार्था भ्रातृभोजनार्था वा द्वितीया इति मध्यपदलोपी कर्म्मधारयः ।) कार्त्तिकशुक्लद्वितीया । तद्विवरणं यथा । यमद्वितीया तु प्रतिपद्युता ग्राह्या-